# दर्शनम्

## योगदर्शनम्

महर्षि-पतञ्जलिः योगदर्शनस्य प्रवक्ता। तस्य नामानुसारम् इदं पातञ्जलदर्शनमित्यभिधीयते। पतञ्जलिप्रणीतः योगसूत्रममिति अस्य दर्शनस्य प्रामाण्यः ग्रन्थः। सांख्यदर्शनं योगदर्शनं च समानतन्त्रं वर्तते। सांख्यानां पञ्चविंशतितत्त्वेन सह अस्मिन् दर्शने 'ईश्वरः' इति तत्त्वमेकं संयुज्य अत्र षड्विंशतितत्त्वानि दृश्यते। योगाभ्यासः योगदर्शनस्य अपरं वैशिष्टमेकम्। विवेकज्ञानेन हि मुक्तिः। देह-मन-बुद्धिभ्यः आत्मा पृथक् इति विवेकज्ञानं भवति। योगाभ्यासेन विवेकज्ञानं लब्धुं शक्यते।

योगः कः इति प्रश्ने 'योगश्चित्तवृत्तिनिरोधः' इति समाधा। क्षिप्त-मूढ-विक्षिप्त-एकाग्र-निरुद्धभेदेन चित्तवृत्तिः पञ्चधा। योगदर्शने अष्टाङ्गयोगस्य मार्गः उल्लिखितः – यमः, नियमः, आसनं, प्राणायामः, प्रत्याहारः, धारणा, ध्यानं, समाधिः च इति। समाधिः द्विविधा सम्प्रज्ञातसमाधिः असम्प्रज्ञातसमाधिश्च। ईश्वरः अत्र एकः एव ध्येयः ज्ञेयश्च। सः एव परमपुरुषः।

# व्याकरणम्

## पाणिनिव्याकरणस्य वृत्तिकाराः टीकाकाराश्च

सूत्रार्थप्रधानः ग्रन्थः वृत्तिः इति। कस्यापि ग्रन्थस्य व्याख्या भवति टीका। अष्टाध्याय्याः उपरि वामन–जयादित्यविरचिता 'काशिका' नाम्ना वृत्तिः प्रसिद्धा। अष्टाध्याय्याः प्रथमपञ्चाध्यायस्य वृत्तिः वामनेन विरचिता, अवशिष्टस्य अध्यायत्रयस्य

रचयिता जयादित्यः । उभयौ वौद्धवैयाकरणौ आस्ताम्। ख्रिष्टीय-सप्तमशताब्द्याः वैयाकरणौ वामनजयादित्यौ। काशिकायाः उपरि पुनः टीका विरचिता वैयाकरणेन जिनेन्द्रबुद्धिना। तस्याः नाम काशिकाविवरणपञ्जिका। अस्याः अपरः नाम न्यासः इति। अस्य वैयाकरणस्य समयकालः ख्रिष्टिय-अष्टमशताब्दी। काशिकाया उपरि पुनः पण्डित-हरदत्तमिश्रस्य ‘पदमञ्जरी’ नाम्ना अन्यैका टीका प्रसिद्धा।

ख्रिष्टीयपञ्चदशशतके वैयाकरणेन रामचन्द्रेण ‘प्रक्रियाकौमुदी’ नाम्ना एका वृत्तिः रचिता। तस्याः उपरि विट्ठलाचार्यस्य ‘प्रसादः’ इति टीका प्रसिद्धा।

अथ पाणिनि-अष्टाध्यायाः उपरि वैयाकरण-भट्टोजिदीक्षितस्य ‘वैयाकरणसिद्धान्तकौमुदी’ नाम्ना टीका सर्वजनप्रसिद्धा। अष्टाध्यायाः विषयावलम्बनेन प्रक्रियाक्रमेण एषा वृत्तिः विरचिता। अस्याः उपरि श्रीवासुदेवदीक्षितस्य ‘वालमनोरमा’ श्रीज्ञानेन्द्रसरस्वतीमहोदयस्य च ‘तत्त्वबोधिनी’ टीका प्रसिद्धा। वैयाकरण-भट्टोजिदीक्षितस्य समयकालः ख्रि. सप्तदशशतकः। वैयाकरणसिद्धान्तकौमुद्याः उपरि ‘प्रौढमनोरमा’ नाम्नी तस्य स्वकीया टीकैका प्रसिद्धा। भट्टोजिदीक्षितस्य गुरुः आसीत् पण्डितः अप्पयदीक्षितः। भट्टोजिदीक्षितेन अष्टाध्यायाः उपरि ‘शब्दकौस्तुभः’ नाम्नापि सूत्रक्रमेण एका वृत्तिः विरचिता।

******